(IIJIF) Impact Factor- 4.172

**Regd. No. : 1687-2006-2007** **ISSN 0974 - 7648**

# J I G Y A S A

**AN INTERDISCIPLINARY PEER REVIEWED REFEREED RESEARCH JOURNAL**

**Chief Editor :** ***Indukant Dixit***

**Executive Editor :** ***Shashi Bhushan Poddar***

**Editor**
***Reeta Yadav***

**Volume 13** **March 2020** **No. III**

***Published by***
**PODDAR FOUNDATION**
**Taranagar Colony**
**Chhittupur, BHU, Varanasi**
**www.jigyasabhu.blogspot.com**
**www.jigyasabhu.com**
**E-mail : jigyasabhu@gmail.com**
**Mob. 9415390515, 0542 2366370**

Scanned with CamScanner

- **बिहार में महिला सशक्तिकरण एवं चुनौतियाँ : कैमूर जिले के मोहनडरवान ग्राम पंचायत के संदर्भ में एक विशेष अध्ययन** 538-543
  ***पंकज कुमार,*** शोध छात्र, लोक प्रशासन विभाग, मगध विश्वविद्याल, बोधगया
- **विद्यालय छात्रों की अभियोजना क्षमता : एक मनोसामाजिक अध्ययन** 544-549
  ***वीणा कुमारी,*** शोधार्थी, शिक्षा विभाग, मगध विश्वविद्यालय, बोधगया
- **वसुधैव कुटुंबकम : शांति एवं सामंजस्य का दर्शन** 550-552
  ***दुमरेन्द्र राजन,*** शोध छात्र, पटना विश्वविद्यालय
- **स्वामी शिवानन्द जी तीर्थ और योग की महत्ता** 553-555
  ***सत्या सुमन सोनी,*** शोध छात्रा, इतिहास विभाग, वीर कुवँर सिंह विश्वविद्यालय, आरा, बिहार।
- **कोविड-19 एवं मनरेगा** 556-562
  ***डॉ. मुहम्मद जावेद,*** एसोसिएट प्रोफेसर, वाणिज्य विभाग, शिब्ली नेशनल कालेज, आज़मगढ़ उ.प्र.
- **आधुनिक विज्ञानस्य कृते वेदनिष्ठसंस्कारविज्ञानस्योपयोगित्वम्** 563-571
  ***कृष्ण मुरारी त्रिपाठी.*** शोधच्छात्र:. वेदविभाग:. संस्कृतविद्याधर्मविज्ञानसंकाय:. काशीहिन्दूविशविद्यालय:


Scanned with CamScanner

# आधुनिक विज्ञानस्य कृते वेदनिष्ठसंस्कारविज्ञानस्योपयोगित्वम्

*कृष्ण मुरारी त्रिपाठी* *

समुपसर्गपूर्वकात् 'डुकृञ् करणे' इत्यस्मात् धातोः भावे घञि सम् + कृ + अ इत्यवस्थायां 'सम्परिभ्यां करोतौ भूषणे' इति सूत्रेण भूषणेऽर्थे सुटि कृते संस्कृ + अ इति जाते, 'अचो ञ्णिति' इत्यनेन अजन्ताङ्गस्य ञिति परे वृद्धौकृतायां संस्कारशब्दो निष्पद्यते।

ऋग्वेदे 'संस्कार' इत्यस्य पवित्रीकरणमित्यर्थः वर्णितः। एवञ्च भूषणार्थकसुडागमविधानेन अस्य अलङ्करणमित्यर्थो भवति। येन कर्मणा किञ्चिद् वैशिष्ट्यं शोभनावाजायते, तदेव संस्कारपदवाच्यम्। संस्क्रियते-अनेन-इति करण-व्युत्पत्त्या ईदृशाऽर्थस्याऽधिगमो जायते।

यथा च छान्दोग्योपनिषदि-

**तस्मादेष एवं यज्ञस्तस्यमनश्च वाक्च वर्तिनी।**
**तयोरन्यतरां मनसा संस्करोति ब्रह्मा वाचा होता।।** [१]

जैमिनीसुत्रेषु संस्कारशब्दस्य बहुधा प्रयोगोद्धऽवलोक्यते। सर्वेषुस्थलेषु शब्दोऽयं पवित्रतार्थे निर्मलतार्थे वा प्रयुक्तः। जैमिनीसूत्रे संस्कारशब्दः उपनयनार्थे प्रयुक्तोऽस्ति।[२]

शबरस्वामिना अपि जैमिनिसूत्रस्य व्याख्यानावसरे संस्कारशब्दस्य विवेचनमेभिः शब्दैः कृतम् –

**संस्कारोनाम स भवति यस्मिञ्जाते पदार्थो भवति योग्यःकस्यचिदर्थस्य**[३]

अर्थात् यदनन्तरं वस्तुनि योग्यताविशेषः-आगच्छति तदेव संस्कारपदस्यार्थः।

वीरमित्रोदये तु 'संस्कार' इत्यस्य योग्यता इत्यर्थः कृतः। मीमांसकास्तु योग्यताम् एव संस्काररूपेण स्वीकुर्वन्ति।[४]

अद्वैतवेदान्तिनस्तु जीवे शारीरिकक्रियाणां मिथ्यारोपं संस्कारपदेन स्वीकुर्वन्ति।[५]

लौकिकसंस्कृतवाङ्मये शिक्षासंस्कृति-प्रशिक्षण[६]-सौजन्यपूर्णता-व्याकरणात्मक-शुद्धि[७]-संस्करण-परिष्करण[८]-शोभा-आभूषण[९]-प्रभाव-स्वरूपस्वभावक्रियास्मरणजनकशक्ति[१०]शुद्धिक्रिया-धार्मिकविधि[११]-विचारभावनादिषु अस्योपयोगः दृश्यते।[१२]

---

* शोधच्छात्रः. वेदविभागः. संस्कृतविद्याधर्मविज्ञानसंकायः. काशीहिन्दूविशविद्यालयः

Scanned with CamScanner

वैदिकसंस्कृतिविवेचनपरेण वेदानां वैज्ञानिकव्याख्याकारेण पण्डितमधुसूदन-ओझामहोदयेन कर्मसम्पादनयोग्यतायाः उत्पादनमिति संस्करशब्दस्यार्थः प्रकाशितः। तेन हि छन्दः समीक्षानामके ग्रन्थे लिखितं यत्-'कस्यचित् कस्मिंश्चिद् कर्मणि योग्यतासम्पादनं हि संस्कारः।

भारतीयसमाजव्यवस्थायां तथा च भारतीयसंस्कृतौ गर्भाधानादीनामुपनयनविवाहादीनां क्रियाकलापानां संज्ञा'संस्कार' इति प्रसिद्धं विद्यते।

एवं प्रकारेण सुस्पष्टं यत् संस्कारस्य अभिप्रायोऽस्मि सा शुद्धा धार्मिकक्रिया या जनैः दैहिक-मानसिक-बौद्धिकपरिष्काराय अनुष्ठीयते, येन सः समाजस्य मान्यः सदस्यो भवेत्। किन्तु संस्कारेषु परम्परागता धार्मिकविधिविचाराः सहवर्तिनश्च नियमा अपि समाविष्टः सन्ति येषामुद्देश्यं केवलमौपचारिक-दैहिकसंस्कार एव नास्ति, अपितु जनानां सम्पूर्णव्यक्तित्वस्य परिष्कारः पूर्णता चापि अस्ति। सामान्यत इदं स्वीक्रियते यद् विधिपूर्वकं संस्कारणामनुष्ठनैः संस्कृतेषु जनेषु विलक्षणत्वैः साकं वर्णनीय-गुणानां प्रादुर्भावो भवति ।

अतः वक्तुं पारयामः यत्संस्कारः केवलं धार्मिकः सामाजिको वा आडम्बरो नास्ति। अस्य महत्त्वस्य उपादेयतायाश्च ज्ञानाभावे सामाजिकपरिबन्धनरूपेणएते करणीयाः सन्तीति मत्वा स्वयमेवास्माभिः एतेषांमहत्त्वं न्यूनीकृतम्। विवाहसंस्कार एको महत्त्वपूर्णः संस्कारोऽस्ति यः स्त्रीपुरुषयोर्मध्ये स्थायिविश्वासं तादात्म्यं च स्थापयति। विवााहसंस्कारेण बद्धौ दम्पतीसर्वदा संवदेते,विवादस्य अवकाशः तयोर्मध्ये न भवति।यतोहिसुखेषु दुःखेष वा तयोः सहभागिता वर्तते। संस्कारं विवर्ज्याद्यतनीयेऽस्माकंसमाजे विवाहादिसमारोहेषु यादृशं वैभवप्रदर्शनं क्रियते तेन न भवत्यस्माकमान्तरिकविकासस्य मार्गप्रशस्तिरति तु तद्विधेः क्रियाकलापैरस्माकं मिथ्याहङ्कार एव तुष्यति।

यतः संस्काराणांमूलभूतं लक्ष्यं मानवेषु नैतिकगुणनामाधानमेवास्ति। अतएव संस्काराणां सम्पादनेन मानवेषुनैतिकगुणानां विकासो भवति। एषु संस्कारेषु जीवनस्य सम्पूर्णा व्यवस्था सम्पादितास्ति यया मानवः समाजे सम्यग्रूपेण जीवनं यापयितुसमर्थो भवति।

अमी गर्भाधानादि-षोडशसंस्काराः प्रायः द्विजानां सर्वत्र भवन्ति। साम्प्रतं भारते भारतीयपद्धत्यनुसारणार्यसंस्कृतेः सनातने वर्त्मनि च पूर्वोक्ताः अमी संस्कारा एवं षोडशसंख्यकाः बाहुल्येन प्रचलिताः सन्ति। वैदिकसंस्कारास्तु यागेष्वेव सम्प्राप्यन्ते। ब्रह्मसंस्कारा एव षोडश संस्कारपरिधौ समायान्ति। प्रायः शास्त्रीयाधारेणैव एषः निर्णयः सामान्यलोकोक्तिक्रमेण समायाति। यतो हि मनुजः प्रथमं मातृगर्भादुत्पन्नो भवति। पश्चात् संस्कारेभ्यः समुत्पन्ना भवति। 'द्वाभ्यां जन्म-संस्काराभ्यां जायते' इति द्विजः।' मातृगर्भान्निस्सरणानन्तरं जातकर्म-यज्ञोपवीतादि-संस्कारेण संस्कृतः मनुष्य एव गार्भिक-बैजिक-एनोनिर्वहणपूर्वकं गर्भजन्य-दोषादबीजयोषाच्च मुक्तः

Scanned with CamScanner

प्रतिसंस्कारसंस्कृत: पुरुष एव द्विजो भवति। षोडशसंस्कारसंस्कृत: पुरुष: संस्कारवान् भूत्वा सम्पूर्णो भवति। संस्कारेण मानव दोषान्मुक्त: गुणैश्च युक्त: सम्पूर्णत्वमेति। अर्थात् सुसंस्कृत: समपूर्णत्वमेति।

सम्प्रति षोडशसंस्कारा एव लोकप्रिया: सन्ति। अतएव शोधपत्रेऽस्मिन् मया षोडशसंस्काराणामेव ग्रहणं कृतम्। यथा-

| | | | |
|---|---|---|---|
| १. गर्भाधानम् | २. पुंसवनम् | ३. सीमान्तोन्नयनम् | ४. जातकर्म |
| ५. नामाकरणम | ६. निष्क्रमणम् | ७. अन्नप्राशनम् | ८. चूडाकर्म |
| ९. कर्णवेध: | १०.उपनयम् | ११. वेदारम्भ: | १२. केशान्त: |
| १३.समावर्तनम् | १४.विवाह: | १५. अग्न्याधानम् | १६.अन्त्येष्टिश्च |

**१. गर्भाधानम्**- गर्भ आधीयते येन कर्मणा तद्गर्भाधानमित्यनुगतार्थं कर्म-नामधेयम् । यस्य कर्मण: पूर्तो स्त्री पतिप्रदत्तं शुक्रं धारयति तदेव गर्भालम्भनं गर्भाधानं वा भवति। एवमेतद् स्पष्टं यदिदंकर्म न काल्पनिकमपितु धार्मिकं कृत्यमेव अन्वर्थं कर्म। अद: प्रजननकार्यं सोद्देश्यं तथा सुसंस्कृतं यथा स्यादतो गर्भाधानसंस्कारोऽपि धार्मिककर्तव्यत्वेन निर्दिष्ट:

**२. पुंसवनम**-गर्भाधाननिश्चयानन्तरं क्रियमाणं कर्म संस्कारो वा पुंसवनम् । पुंसवन नाम गर्भस्थशिशो: पुरुषत्वप्रदानम् । पुमान् प्रसूयते येन कर्मणा तत् पुंसवनमीरितम्। अस्मिन्नवसरे पठितासुगीतर्चासु पुमान् अथवा पुत्रोल्लेखोऽस्ति। ता: पुत्रजन्मन: अनुमादेनं कुर्वन्ति। पुत्रप्रसविका माता प्रशंसायोग्या समाजे सम्मान्या चासीत् ।

स्मृतिषु पुंसवनसंस्कारस्य अनुष्ठनाय सम्यक्-कालस्य चर्चाकृता अस्ति। मनुयाज्ञवल्क्यानुसारेण गर्भाशये गर्भगतिशीलनात् प्राक् संस्कारोऽयं कर्तव्य:।शङ्खोऽपि एतदेवानुसरति। बृहस्पत्यनुसारेण गर्भस्पन्दनशीलनान्तरमेव कृत्यमिदं कर्तव्यम् ।

जातूकर्ण्य: द्वितीये वा मासि पुंसवनं भवेदिति। पारस्करोऽपि मासे द्वितीये, तृतीये वा यदह: पुंसा नक्षत्रेण चन्द्रमा: स्यात् तत्र पुंसवनमिति। संस्कारस्य काल: गर्भात् द्वितीयमासत:अष्टममासपर्यन्तं मन्यतेस्म। अत्र बीजन्तु विभिन्नासु स्त्रीषु। वैविध्येऽस्मिन कुलाचार प्रथा: पारिवारिकीप्रथा च कारणानि भवन्ति। एषु कालेषु बृहस्पति: एवं भेदं स्थापयति प्रथमे गर्भे संस्कारोऽयं तृतीयामास कर्तव्य:। द्वितीयप्रसवितृत्वसम्पन्नायां स्त्रियां कृत्यमिदं चतुर्थे षष्टे अष्टमे मासे वा समाधेयम् ।

**३. सीमन्तोन्नयनम्–** गर्भस्थस्य तृतीय: संस्कार: सीमन्तोन्नयनसस्कार:। सीमन्त: उन्नीयते यस्मिन्कर्मणि तत् सीमान्तोन्नयनमितिकर्मनाम धेयम् । अस्य नाम्न: कारणमस्ति यदास्मिन कृत्ये गर्भिण्या: स्त्रिय:केशानामुन्नयनं कर्तव्यमिति।

गृह्यसूत्रेषु स्मृतिषु ज्यौतिषग्रन्थेषु च संस्कारोऽयं कदा भवेत्? अयं प्रश्न: समुदेति। गृह्यसूत्रं प्राय: चतुर्थे, पंञ्चमे मासे वा, आदिशति। स्मृत्यनुसारेण षष्ठे अष्टमे मासे वा भवतु। ज्यौतिषा: जन्मन: पूर्व कदापि भवत्विदं स्वीकुर्वन्ति। कतिपये स्मृतिकार: विषयेऽस्मिन् अतोऽधिका: उदारचित्ता: दृश्यन्ते। तन्मते यदि

Scanned with CamScanner

सीमान्तोन्नयनसंकारात् पूर्वमेव सन्ततिप्रसवःस्यात्तर्हि शिशुजन्मनः अनन्तरं मातुरङ्के मञ्जूषायां वा स्थाप्यसंस्कारोऽयं क्रियते स्म।

**४. जातकर्म-** पुत्रे जाते सति जातस्य यत्कर्म तज्जातकर्म उच्यते। येन कर्मणा जातकस्य शिशोः गर्भवासजनितसकलदोषो निवर्तते। आयुर्मेधा च वर्द्धते, तदेव कर्म जातकर्माख्यः संस्कारविशेषः।

**५. नामकरणम् –** नाम्नः करणं नामकरणम् 'अणीयस्त्वाच्च संज्ञाकरणं व्यवहारार्थं लोक' इति यास्कवचनात् नामकरणस्य आवश्यकतायाः प्रतीतिः प्रबलतया ज्ञायते। इह लौकिकसमस्तकार्यसम्पादनार्थं नामकरणम् अतएवाह बृहस्पतिः

**नामाखिलस्य व्यवाहरहेतुः शुभावहं कर्मसु भाग्यहेतुः।**
**नाम्नैव कीर्तिं समते मनुष्यस्ततः प्रशस्तं खलु नामकर्म ।।**

**६. निष्क्रमणम् –** निष्क्रमणं नाम शिशोर्गृहात् प्रथमं बहिर्गमनम्। सुरक्षार्थां प्रसूतिकागृहे कञ्चित् निर्धारितकालं शिशु गृहे संरक्ष्य नियतकाले नियतमुहूर्ते एवं बहिरानयति न तु यदा कदापि। एष एवसंस्कारः प्रसूतिगृहात्प्रथमबहिर्निर्गमनात्माको निष्क्रमणमिति कथ्यते।

**७. अन्नप्राशनम्-** गर्भवासमलिनभक्षणादिदोषनिरासपूर्वकेन्द्रियायुर्बलत्वस्थै-र्यब्रह्मतेजः प्राप्तिप्रयोजनकोऽयमन्नप्राशनसंस्कारः। अन्नस्य प्रकृष्टरूपेण मन्त्रपाठादिना इष्टकुलदेवादिपूजनपुरः सरं प्रथमतः यत् क्रियते तदन्नाप्राशनामिति पारस्करादयः। मनुस्तु षष्ठेऽथवाष्टमे वा कुलाचारानुसारं यदीष्टं तदान्नप्राशनं करणीयम् समस्तु षष्टेऽष्टमे कुलेष्ट वेति मन्यते।

**८. चूडाकर्म -** चूडानां केशपाशानां करणंसंस्कारो येन कर्मणा तच्चूडाकरणमिति वक्ष्यमाणसंस्कारकर्मणो नामधयेम् दृष्टफलेषु हिन्दुत्वबोधनमेव। तां विना हिन्दोः तदितरभेदकबाह्यचिन्हान्तराभावात। उपवीतं तु द्विजत्वमात्रबोधकम, शूद्रस्य तत्रानधिकारात्। परन्तु शिखया तु ब्राह्मणादयश्चत्वारोऽपिहिन्दुपदाभिधेयाःपरिचीचन्ते।यथोक्तंकेनचित् 'शिखावत्वं हिन्दुत्वम्'।

चूडाकरणसंस्कारकालविषये विभिन्नमतानि उपलक्ष्यन्ते। तत्र यथा –

**तृतीय वर्षे चौलं यथाकुलधर्म वा।**
**कुलधर्मोपदिष्टे वा काले चौलं कार्यम् ।।**
**जन्मप्रभृति तृतीये वर्षे वा कार्यमिति।**
**व्यवस्थितिविकल्पः केषाञ्चिदुपनयनेन सह स्मर्यत इति।।**
**तृतीये पञ्चमे वाऽब्दे चौलकर्म प्रशस्यते।**
**प्राग्वाऽसमे सप्तमें वा सहापनयनेन वा।** इति आश्वालायनगृह्य सूत्रे।

**९. कर्णवेधः** कर्णविधसंस्कारस्य विषये वेदगृह्यसूत्रस्मृत्यादिग्रन्थेषु विस्तृतरूपेण कोऽपि उल्लेखःन प्राप्यते। तथापित अथर्ववेदस्यायंमन्त्र संस्कारमिमं प्रमाणयति-

Scanned with CamScanner

**लोहितेन स्वधितिना मिथुनं कर्णयोः कृधि।**
**अकर्ताश्श्विना लक्ष्य तदस्तु प्रजया बहु।।**

अर्थात् लौहशलाकया द्वयोः कर्णयोः चिह्नं क्रियते। अश्विनीकुमार इतिनाम्ना देवः चिह्नितं स्थानं निर्दिशति। अमुना कल्याणं भवति सन्ततीनाम् । एतेन मन्त्रेण कर्णवेधसंस्कारस्य संङ्केतो लभ्यते। यद्यपि मन्त्रोऽयं ग्रन्थेषु गवां वर्णनप्रसङ्गे आयाति। तथापि एतेन मन्त्रेण दृष्टिगोचरों भवति यत् कर्णवेधसंस्कार आसीत् ।

**१०. उपनयनम्-** 'उप' उपसर्गपूर्वकात् 'नी' धातोः 'ल्युट्' प्रत्यये कृते सति उपनयनशब्दो निष्पद्यते यस्यार्थो भवति समीप आनयनम। उपनयनं नाम आचार्य समीपनयनाङ्गको गायत्र्युपदेशप्रधानकः कर्मविशेषः। यथा –

**गृह्योक्तकर्मणा येन समीपं नीयते गुरोः।**
**बालो वेदाय तद्योगाद् बालस्योपनयं विदुः ।।**

**११. वेदारम्भः** वेदारम्भसंस्कारस्योल्लेख केवलं व्याससमृतौ वेदारम्भ क्रियाविधौ द्वितीयचरणे प्राप्यते। गृह्यसूत्रेस्मृतिग्रन्थे च अस्य प्रत्यक्षतया नामोल्लेखःन प्राप्यते। तथापि संस्कारस्य स्पष्टसंङ्केतः सर्वत्र प्राप्यते।

**१२. केशान्तः** केशान्तसंस्कार एव गोदानसंस्कार इति नाम्ना ज्ञायते। संस्कारोऽयं शरीरेणव्यवहारेण च सम्बद्धोऽस्ति। अत्र शिष्यस्य क्षौरकर्म क्रियते। तदनन्तरं गोदानं भवति। शिष्यः युवावस्थायां समागतः तस्य सूचकोऽयं संस्कारः। षोडशवर्षे संस्कारोऽयं विधेयः।चौलसंस्कारवत् सर्वे विधयः क्रियतेऽस्मिन संस्कारे।

**१३. समावर्तनम् –** 'सम् + आ' उपसर्गपूर्वकात् 'वृतु' धातोः ल्युट प्रत्यये कृते सति 'समावर्तन' शब्द निष्पद्यते। यस्यार्थः भवति वेदाध्ययनान्तरं गुरुकुलात् स्वगृहागतमनम् इति। उक्तञ्च वीरिमित्रोदये - **तत्र समावर्तनं नाम वेदाध्ययनानन्तरगुरुकुलात् स्वगृहागमनम्। उपनयनसंस्कारः गुरुकुलप्रवेशार्थम्, समावर्तनसस्कारः गुरुकुलाात् प्रत्यावर्तनार्थम् ।**

**१४. विवाहसंस्कारः**'वि' उपसर्गात् वहधातोः 'घञ्' प्रत्ययकृते विवाहशब्दः सिद्धयति। वहनं वाहः, विशिष्टो वाहोविवाह इति। 'विवाह विशिष्ट वहनं ' इति शब्दकल्पद्रुमः। यद्यपि विशिष्टवहनं यस्य कस्यापि वस्तुनः सम्भवति तथापित विवाहशब्दो योगरूढत्वेन साम्प्रतं दारपरिग्रहार्थ एव प्रयुज्यते।

**१५. अग्न्याधानम् (अग्निपरिग्रहः)** विवाहसंस्कारे लाजाहोमादि क्रियासुयस्मिन् अग्नौ होमाहुतिः सम्पाद्यतेतस्य नाम आवसथ्य 'अग्निरिति। अस्यैव नाम विवाहग्निरपि। अस्याग्नेःआहरणमम्, पिरसमूहनम्, स्थापनं प्रभृतयश्च क्रियाःसंस्कारेऽस्मिन सम्पाद्यन्ते। विवाहग्नेराहरणं कृतो भवेदित्यत्रमतवैभिन्नयं प्राप्यते, तत्र पशुवतो वैश्यगृहात् अग्निमानीय विवाहमण्डपे उपलिप्त पवित्रभूमौ परिसमूहनं पर्युक्षणपूर्वकञ्च अग्निस्थापनं समन्त्रं विधिर्निर्दिष्टेन मार्गेणकर्तव्यम् ।

Scanned with CamScanner

**१६. अन्त्येष्टि संस्कार**:- भारतीयसंस्कृत्यामन्तितमोऽयं संस्कारः। मनुष्यस्य मृत्यो:पश्चात् संस्कारेऽयं भवति। अन्त्येष्टिसंस्कारस्य वर्णनं वैदिक साहित्यादारभ्य पुराणसाहित्यपर्यन्तं विद्यते। अद्यापि व्यक्ते मृत्यो: पश्चात्त तस्य अन्त्येष्टि संस्कार:धर्मसम्प्रदायानुसारेण भवति। सूत्रकाराणां मतं विद्यतेयत् जातकर्मसंस्कारादिमाध्यमेन व्यक्ति: जीवने अभ्युदयं प्राप्नोति, अन्तयेष्टिसंस्कारद्वारा परलोकञ्च गच्छति। तद्यथा– **जातसंस्कारेणेमं लोकमभिजयतिमृतसंस्कारेणामुं लोकम्।**

**षोडशसंस्काराणां महत्वं-**

भारतीयचिन्तनधारा पुनर्जन्मसिद्धान्तेन प्रभावित वर्तते। पुनर्जन्मवाद-माश्रित्यैवास्माकं चिन्तनं प्रवर्तते,यथा चोक्तं श्रीमदभगवद्गीतायाम् –

**न त्वेवाहं जातु नासं न त्वं ने मे जनाधिपाः।**
**न चैव न भविष्यामः सर्वे वयमतः परम्।।**[१३]

अतएव भारतीयमनीषिणां मतमस्ति यत् नवजातशिशुः पूर्वजन्मनि कृतानां कर्मणां संस्कार गृहीत्वैव इह जन्मनि समुत्पद्यते। समुत्पन्ने शरीरेसंरचितायां बुद्धौ च। तत्तत्संस्कारं प्रभाव आत्मनि संपृक्तत्वेन अनुभूयते। अतएव पूर्वसंस्कारानाश्रित्यैव अस्मिन् जन्मनि विभिन्नेषु कार्येषु प्रवर्तते। प्रायशो दृष्टिाथमायाति यत् कश्चित् जन्मः जन्मत एवं आध्यात्मिकविचारं प्रति आकृष्टे भवति। दुष्कर्मस्वेव च अन्यस्य मनो रमे। तत्रैन स्पष्टयत प्राक्तनजन्मतः संस्कारान्गृहीत्वैव मानवोऽपरं जन्म गृह्णाति। एतेषां संस्काराणां निश्चितस्मृति: जनजातशिशौ न भवति।अतएव एतेषु संस्कारेषु संशोधनम,परिवर्धन, परिवर्तनश्च वर्त्तमानसंस्कारै: कर्त्तुं शक्यते।एभि: संस्कारै: तस्य शिशो: व्यक्तित्वस्य सार्वङ्गीणविकासो भवति। समये-समये एतदर्थया प्रक्रिया प्रचाल्यते तस्यैव 'संस्कार' इति संज्ञा। एभि: संस्कारै: जातकस्य शारीरक-मानसिक बौद्धिकाध्यात्मिकक्षमतानां क्रमिकविकासो भवति। व्यक्त: व्यक्तित्वस्य चानेन ाध्यमेन सम्पूर्णविकास: क्रियते।

अतएव वेदपुराणधर्मशास्त्रेषु संस्काराणामावश्यकता वर्णिताऽसितं यथा- सुवर्णादिपदार्थानां तापनमाध्यमेन मलनिवारणं कृत्वा तेषां परिशोधनेन सुन्दरीकरणं स्वरूपस्य प्रकाशनञ्च क्रियते तथैव मावेषु मावीयगुणानां च आधानाय विकासाय निगमागमसम्मत्तमसंस्कारा: सर्वथा अपेक्ष्यन्ते। अभिप्रायोऽस्ति यत् मनुष्याः पूर्णतः विधिपूर्वकसंस्कारसम्पन्नाः भवेयुः। वस्तुत: विधिपूर्वकसंस्कारसाधनेन दिव्यज्ञानमुत्पाद्य आत्मन: परमात्मस्वरूपे प्रतिष्ठपनमेव संस्कारस्योद्देशमास्ति

**अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतश्नुते**

मानवजीवनप्राप्तेश्च सार्थकताऽपि चतुर्थसोपानसिद्धिरूपेण मुक्त सिद्धयतितत्र संस्कारै:शरीरादिशुद्धिर्भवति। शुद्धाद्धन्त:करणेन अस्माकं सन्मार्गे साधुतया प्रवृत्तिर्भवति। सज्जनप्रवृत्या यथोद्देश्यं मोक्षादिकं प्राप्यते। स च संस्कारो द्विविधः -

Scanned with CamScanner

१. मलापनयनम् २. अतिशयाधानञ्च। तत्र अपनयनं नाम दूरीकरणम केनचित् विशिष्टापदार्थेन तद्दर्पणस्य प्रकाशवैशिष्ट्यानयनमतिशयाधानम्। अत्र दिव्यशाक्तिर्विशेषो वा प्रकाशविशेष एव अतिशयशब्देन लभ्यते। आधानमुपस्थापनम् अर्थात् संस्कारविशेषस्य आधानमतिशयाधानम् । एवमेव भावनाप्रतियत्नगुणाधानादि-शब्दाः संस्कारवाचकाः एव सन्ति। यथोक्तं मनुस्मृतौ द्विजस्य जातकर्मणा उपयनादिसंस्कारैः बीजगर्भादिजन्यदोषाणां पापानां वा अपमार्जनं भवति।[१४]

मनोरिदमपि कथनमस्ति यत् द्विजानां गर्भाधानादिशारीरिकसंस्काराःवैदिकमन्त्रैः कार्याः। सस्काराः इहलोके परलोके च पवित्रयन्ति।[१५]

याज्ञवल्क्योऽपित इममेव विचारं प्रतिपादयति। यथ वा अङ्गिरस्स्मृतौ-

शोभनाकृतिचित्रनिर्माणार्थतत्र वैशिष्ट्यातिदेशार्थं कर्म-कुशैलैः यथा आवश्यकतामनुभूय तत् – तद् वर्णैः रज्जनं क्रियते तथैव मानवानां चरित्रनिर्माणार्थ संस्काराणां सविधि प्रतिपादननमावश्यकम्।[१६]

संस्कारः मानवादारभ्य व्यक्तिं प्रति तथा परिवारादिविश्वं यावत् परिवारस्य समाजस्य राष्ट्रस्य च हितसाधनं करोति। संस्कारेण मानवानां मनसि आस्तिकतायाः भावना उन्मीलिता प्रतिष्ठा च भवति। मानवः सन्ध्यावन्दनजपहवनादि-नित्यैमित्तिकर्माणि यथाविधि सम्पादयन् स्वजीवनं सात्त्विकं सुखमयञ्च करोति।

महर्षिमनोरनुसारेण स्वाध्याव्रतहोमदेवर्षितर्पणयज्ञसन्तानोत्पत्तीज्याभिः पञ्च महायज्ञान्मनुष्ठानैश्चेद शरीरं ब्रह्मप्रयुक्तंक्रियतेऽर्थात्, ब्रह्मप्राप्त्यर्थं योग्यतां प्राप्तनोति।[१७]

मानवानां जीवने आचारग्रहणार्थं त्स्योत्तरोत्तरमभिवृद्धयर्थं जन्मतः मृत्युपर्यन्तं षोडशसंकाराःक्रमिकविकासार्थमेव विहिताः।[१८]

आधानमपि समर्थस्त्रीपुरुषयोः ऋतुकालिकयोगसत्त्वेन सल्लग्नमुहूर्त्तदिव-सग्रहर्क्षयोगैश्चाधनाज्जन्मपर्यन्तमेव विभिन्नसंस्काराः मन्त्रतन्त्रयन्त्रौषध्यादिभिः वैदिक मन्त्रयोगैः कर्मकाण्डैश्च सम्पाद्यन्ते।

गर्भाधाने सत्त्वे मासानां क्रमेण जीवस्य द्वितीये मासे प्रथमः, षष्ठे मासे द्वितीयः संस्कारः क्रियते। वस्तुतः रहस्यमिदं वैज्ञानिकम्। मातुः आहारविहारेण गर्भस्थः शिशुः स्वजीवनत्त्वं गृह्णाति। न केवलं भोजनादिकमपि तु मातुः मानसिकी स्थितिरपि महत्वपूर्णा भवति। महाभारते मातुः श्रवणक्रियाप्रसंङ्गे सुभ्रदार्जुनयोः कथा प्रसिद्ध वर्तते। अर्जुनः एकदा स्वत्नीं सुभद्रां चक्रव्यूहनीतिमश्रावयत्। तत्रत कथा समाप्तेः पूर्वमेव निद्रापन्ना सुभद्रा शेषाशं न श्रुतवती, तेनैव अज्ञातेन शोषांशेन अभिमन्युः चक्रव्यूहे बद्धे मृतश्च। अनेन ज्ञायते यत् मातुः सर्वा क्रियाः संस्काररूपाः बालकं प्रभावयन्ति।

Scanned with CamScanner

ऋग्वेदे उक्तं यत् माता-पिता च द्वावपि सदैव सावधानौ भवेतां येन सन्तति: अन्यथाचारयुक्तो न भवेत् ।[११]

प्रसूत: प्रथमत: शूद्रो भवति, तत: उपनयनादिसंस्कारेण संस्कृत: वर्णाश्रमविधानं मानवीयसर्वाङ्गीणविकासञ्च द्विजो वेदाध्ययनेन विप्रत्वं प्राप्य विद्योपासनया ब्रह्मसाक्षात्कारेण च ब्राह्मणो भवति। यथा-

**जन्मना जायते शूद्रः संस्कारात् द्विज उच्यते।**
**वेदाभ्यासी भवेद्विप्रः ब्रह्म जानाति ब्राह्मणः।।**

तत्राद्य भारते समुत्पन्नो मानव एवात्मानं गर्हयतीति किमत: परमाश्चर्यं स्यात्। तदेतद् वेद-वैदिकविद्वेषस्यैव फलामिति वयं प्रतीम:। संप्रति वैदेशिकविज्ञानचमत्कारचमत्कृता विपश्चितोऽपि वेदं, वैदिकमार्षवचनं तत्रत्यां प्रक्रियांच, तर्कवादे भृशं व्यर्थंदूषयन्ति। एतेषां सम्प्रदायानामेकाङ्गत्वं तु वर्त्तत एव। आहारऋविहारादिष्वपि व्यभिचारस्यैव प्राधान्यम भारतीयशिक्षाहीना: पाश्चात्यानुचरा: वा शिक्षाहीना अभावग्रस्ताश्च मृगतृष्णायां मग्ना: सन्त इहलोकेन साकं परलोकमपि नाशयन्ति। अस्य अयमर्थ: यत ऐते सम्प्रदाया: व्यर्था: सन्ति। परमिदं तु सत्यमेवयत् सर्वे प्राकृतिकनियमा: सनासत्वमवधरयन्ति। स्थित्यन्तरमपि न भवति सद्य:। अतएव सर्वाभिप्रायिका: राष्ट्रियनियोजने संस्कारा: तेषां वैज्ञानिकक्रम: मानवीयसर्वाङ्गीणविकासक्रम: नैतिकताया: विधानं सर्वाभीष्टप्रापकत्वेन राष्ट्रियमानकत्वेन जीवनस्य प्रत्येकक्षेत्रे स्वानुरोधेन शिक्षणेऽन्वेषणे च संघीयोद्यमत्वेन भवेत्। निगमागमसम्मतेभ्य वैदिकसिद्धान्तेभ्य: वेदविहिताचरणेभ्यो बहिर्गता: वेद्वेषरत: जाता: अपर मतान्यनुसरन्तोऽपि न जीवनस्य वास्तविकं सुखमीहोपरं वा प्राप्नुवन्ति। यावतांशेनास्मदाप्रवचनोकतानामहिंसासत्यास्तेयादीनां यमादीनां तत्तन्मतेषु स्थितरस्ति तावानेवांशो मानवं मानवतां च सत्यापयति, न तु सर्वाशतयेति वास्तविकी स्थिति:।

अस्माकं भारतीयैर्महर्षिभि: शारीरिकीं मानसिकीमाध्यत्मिकीं सामाजिकीं च शुद्धिमभिलक्ष्य सस्काराणामन्येषां च कर्मणां निर्धरणं कृतं वद्यिते। अत एवास्माकं स्मार्तो बाड्.मय: सुमहाननितरसाधारणश्च लभ्यत इति महते गौरवायास्ति

**सन्दर्भ सूची –**


१. छा.उ. ४.१६. १-२
२. जै.सू. – ६.१.३५
३. जै.सू. शबरभाष्यम- ३.१.३
४. प्रोक्षणादिजन्यसंस्कारो याज्ञाङ्गपुरोडाशेष्विति द्रव्यधर्म:वाचस्पत्सबृहदभिधानम् -५ पृ० ५१८८
५. स्नानाचमानादिजन्या: संस्कारा देहे उत्पष्माना अपि तदभिमानिजीवे कल्प्यन्ते। वाचस्पत्यबृहदभिधानम् – ५
६. निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवराजशब्दभाव। रघुवंशम-३.३५


Scanned with CamScanner

७. संस्कारवत्येव गिरामनीषी तथासपूतश्च विभूतिषतश्च। कुमारसम्भवम्-१.२८.
८. प्रयुक्तसंस्कार इवाधिकं बभै। रघुवंशम् ३.१८
९. स्वभावसुन्दरं वस्तु न संस्कारमपेक्षतो। शाकुन्तलम् ७७.३३
१०. संस्कारजन्यं ज्ञान स्मृति:- तर्कसंग्रह:
११. कार्य:शरीरसंस्कार: पावन: प्रेत्य चेह च। म.स्मृ- २.२६
१२. फलानुमेया: प्रारम्भा: प्राक्तना इव। रघुवंशम-१.२०
१३. गीता- २.१२
१४. गार्भैर्होमैर्जातकर्मचौडमोञ्जीनिबन्धनै:
बैजिकं गार्भिकं चौनो द्विजानामपमृज्यते।। मम. स्मृ- २.२७
१५. वैदिकै: कर्मर्भि:पुण्यैर्निषेकादिर्द्विजन्मानाम्।
कार्य शरीरसंस्कार: पावन: पेत्य चेह च।।म.स्मृ.-२.२६
१६. चित्रकर्म यथानेकै रागैरून्मील्यते शनै:
तद्वत्स्यात्संस्कारैर्मन्त्रपूर्वकै: अ.स्मृ-४.१०
१७. स्वाध्यायेन ब्रर्तैर्होमैस्त्रैविद्येनेज्यय सुतै:।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनु: ॥ म.स्मृ. २.२८
१८. निषेकाद्या श्मशनान्तास्तेषं वै मन्त्रत: किया: या.स्मृ.
१९. यन्ते माता प्रममद्याात् यच्चचारावनुव्रतम् ।
तन्में रेत:पिता वृङ्क्तान्मा भुरण्योपपद्याताम्। ऋ.वे.

***

Scanned with CamScanner